संस्कृत अकाडमी ग्रन्थमाला - 104

In Public domain. Digitization Muthulakshmi Research Academy

द्विरूपकोशसङ्ग्रहः

द्विरूपकोशः - श्रीहर्षमहाकविः

द्विरूपकोशः - पुरुषोत्तमदेवः

शब्दभेदप्रकाशः - पुरुषोत्तमदेवः

प्रधानसम्पादकः

आचार्य के. नीलकण्ठम्

निदेशकः

सम्पादकः

डा. सन्तोषकुमारः जोशी

शोधसहायकः

संस्कृत अकाडमी

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद्

2020

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतअकाडमी ग्रन्थमाला - 104

द्विरूपकोशसङ्ग्रहः

द्विरूपकोशः - श्रीहर्षमहाकविः

द्विरूपकोशः - पुरुषोत्तमदेवः

शब्दभेदप्रकाशः - पुरुषोत्तमदेवः

प्रधानसम्पादकः

आचार्य के.नीलकण्ठम्

निदेशकः

सम्पादकः

डा.सन्तोषकुमारःजोशी

शोधसहायकः

संस्कृत अकाडमी

राष्ट्रियसंस्कृतसंस्थानेन मानिताआदर्शशोधसंस्था

उस्मानिया विश्ववविद्यालयः, हैदराबाद्

2020

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमीग्रन्थमाला-104

1.द्विरूपकोशः - श्रीहर्षमहाकविः

2.द्विरूपकोशः - पुरुषोत्तमदेवः

3.द्विरूपकोशः (शब्दभेदप्रकाशः) - पुरुषोत्तमदेवः

ISBN - 978-93-80171-39-5

प्रथममुद्रणम्-2020

मुद्रितप्रतयः–500

पृष्टसंख्या - 108

मूल्यम् - 90/-

© सर्वाधिकाराः संस्कृतपरिषादायत्ताः

प्राप्तिस्थानम्

निदेशकः

संस्कृत अकाडमी

राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था

उस्मानिया विश्वविद्यालयः, हैदराबाद् - 500007

दूरवाणी - 040-27070281

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-104

DVIRUPA KOSHA SANGRAHA

DVIRUPAKOSHA- SRI HARSHA MAHAKVI
DVIRUPAKOSHA- PURUSHOTTAMADEVA
SHABDABHEDAPRAKASHA- PURUSHOTTAMADEVA

Chief Editor
Prof K. Neelakantham
Director

Editor
Dr. Joshi Santosh Kumar
Research Assistant

SANSKRIT ACADEMY
(Adarsha Shodha Samstha)
Recognised by Rashtriya Sanskrit Sansthan, New Delhi
Osmania University, Hyderabad-07
2020

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series -104

1.DVIRUPAKOSHA– SRI HARSHA MAHAKVI
2.DVIRUPAKOSHA- PURUSHOTTAMADEVA
3.SHABDABHEDAPRAKASHA- PURUSHOTTAMADEVA

ISBN – 978-93-80171-39-5

First Edition: 2020

Copies: 500

Price: Rs.90/-

Pages: 108

© Sanskrit Academy

Copies can be had from-

Director
SANSKRIT ACADEMY
(Adarsha Shodha Samstha)
Osmania University,
Hyderabad - 5000 07
Phone & Fax: 040-27070281
Email: sanskritacademyhyd@gmail.com
Website: www.osmania.ac.in/sanskritacademy

Printed at:
Bhandari Arts 'N' Printers, Hyderabad.

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

भारते निघण्टुपरम्परा अति प्राचीना। वैदिककालादेव निघण्टुग्रन्थानां रचनं लोके वरीवर्ति। मन्त्रद्रष्टारः ऋषय एव निघण्टूनरचयामासुः। निघण्टवः व्याकरणञ्च भाषायाः महत्वमभिवर्धयितुमुपयुक्ता इति कविभिः पण्डितैश्च अङ्गीकृतोंऽशः। वेदाङ्गेष्वन्यतमं व्याकरणं वेदमन्त्रेषु लौकिकभाषायां चोपयुक्तानां शब्दानां क्रियापदानां च व्युत्पत्तिं तेषां स्वरूपञ्च बोधयितुं रचितं पाणिन्यादिभिः ऋषिभिः। एवमेव प्राचीनकालात् वैयाकरणपण्डिता एव व्याकरणेन सह निघण्टुग्रन्थानपि विनिर्ममुः। "अर्थान्निघण्टयत्यास्मिन्निघण्टुःपरिकीर्तितः'इत्यादिना निघण्टोः प्रयोजनं प्रकटीकृतमस्ति पण्डितैः।शक्तिग्राहकेषु व्याकरणवत् निघण्टुरपि शब्दार्थपरिज्ञानायोपकरोति। अतः निघण्टूनां ज्ञानमपि विदुषे अत्यन्तमावश्यकमिति ज्ञायते। एवमेव "कोषावानाचार्यः" इति प्राचीनैः निर्दिष्टानुसारं संस्कृतनिघण्टून् कोशांश्च सम्पूर्णतया यः अधिगच्छति स एव पण्डितो भवितुमर्हतीति च ज्ञायते । अत एव वेदाङ्गेषु व्याकरणेन सह भाषायाः अध्ययने अत्यन्तोपकारि शास्त्रमस्ति निरुक्तम् ।

वैदिकानि पदानि सङ्गृह्य तेषां व्युत्पत्तिं प्रयोजनञ्च ख्यापयितुं महर्षिभिः यास्कादिभिः निरुक्तकारैः वेदानाम् अर्थं लोकम्प्रत्यवगमयितुं नैके ग्रन्थाः निर्मिताः। यास्कमुनिना सह

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्दशनिघण्टुकाराः आसन्निति साहित्येतिहासग्रन्थानामध्ययनेन ज्ञायते। परन्तु यास्कमुनेरनन्तरं निघण्टुकर्तृषु केवलं भागुरि पण्डितस्यैव नाम श्रूयते दृश्यते च साहित्यलोके। अमरकोशस्य टीकायाम्, हेमचन्द्रकृत अभिधानचिन्तामणि व्याख्याने सायणाचार्य कृत 'धातुवृत्तौ'भागुरि पण्डितस्य प्रस्तावः दृश्यते। एवमेतेषां ग्रन्थानामध्ययनेन भागुरिः 'त्रिकाण्ड'मित्याख्यं कोशमरचयदिति ज्ञायते। पाणिनेः पूर्वतनेषुवैयाकरणेष्वपि भागुरि नाम्ना कश्चन वैयाकरणः आसीत्, प्रायः स एव त्रिकाण्डकोशं रचयमासेति विपश्चिदामाशयः। भानुजी दीक्षितेन कृतायां अमरकोशस्य टीकायां वैयाकरणः अपिशलिरपि 'निघण्टुग्रन्थं' कञ्चन निबबन्धेति सूचितम्। व्याकरणशास्त्रे उणादिसूत्राणं वृत्तिकारेण उज्ज्वलदत्तेनापि अपिशलिकोशमुदाहृतम् एवं प्राचीन निघण्टूनां टीकानाञ्चा-ध्ययनेन शाकटायनः व्याडिः इत्यादयः निघण्टुग्रन्थान् रचयामासुरितिअवगम्यते।

यास्कामुनिरचितं निरुक्तम् अनुसृत्य केचन पण्डिताः वेदार्थशब्दकोशः'वैदिकशब्दार्थपारिजातम्'इत्यादि ग्रन्थान् व्यरचयन्। परन्तु यास्कनिरुक्तमेव वेदार्थावबोधनाय सम्यगुपकरोति इति सर्वैरङ्गीकृतः अंशः।

अन्यच्च ध्वनिपद वाक्यार्थादीनि भाषाविज्ञानस्य प्रमुखाङ्गत्वेन ख्यातानि। साधारणतया भाषायां कस्यामपि

In Public domain. Digitization Muthulakshmi Research Academy

प्रयुतानामर्थतत्वानां वर्णानुक्रमपद्धत्या सूचीबद्धकरणमेव कोशनिर्माणमभिधीयते। शब्दानां व्युत्पत्तिः तेषामर्थ निर्धारणम्, समानार्थक-पर्यायवाचकशब्दानाञ्च एकत्रीकरणं कोशनिर्माण-पद्धतिमनुसृत्येत्यादयः कोशविज्ञानस्यैवांशाः भवन्ति। भाषाविज्ञानं शब्दविज्ञानस्यैवाङ्गमित्यवबुध्यते। शब्दसङ्कलनम्, कोशकलायाः आधाररूपाणि वर्तन्ते। व्याकरणं, कोशः साहित्यञ्चेति तिस्रः भाषाविज्ञानस्य शाखाः। तिस्रः एताः अन्योन्याश्रया भवन्ति। वाङ्मयमवगन्तुं तत्रस्थ शब्दानां व्युत्पत्तिज्ञानाय अर्थज्ञानाय च व्याकरणं कोशश्च प्रधानतमौ अङ्गौ। अत एव प्राचीनकालात् ऋषयः वाङ्मयं सृष्ट्वा तेन सह व्याकरणनिरुक्तादिशास्त्राणि नैकान् कोशग्रन्थांश्च लोकाय ददुः।

एवं वैदिकनिघण्टून् तत्तच्छास्त्रसम्बन्धिकोशग्रन्थांश्चानुसृत्य लौकिकसंस्कृतभाषायामपि कोशग्रन्थान् रचयमासुः विद्वद्वराः। किन्तु वैदिकनिघण्टुभ्यः परं लौकिकवाङ्मयस्थ कोशग्रन्थानां रचने विभिन्नमार्गम् अनुसृतवन्तः।कोशकाराः। तत्र केषुचन कोशेषु केवलं संज्ञावाचकशब्दानां केषुचन धातूनां , अन्येषु च समानार्थकपदानां, पर्यायवाचकपदानाम्, नानार्थक-पदानाञ्च सूचीक्रमं निबद्धं पण्डितैः। एते कोशग्रन्थाः सर्वेऽपि पदानां शब्दानां अकारादिक्रमं विहाय श्लोकरूपेणोपनिबद्धाः। अन्यत्र कोशग्रन्थानामुत्पत्तिं विचारयामश्चेत् कात्यायनस्य न्यायमाला, वाचस्पतेः शब्दकोशः, विक्रमादित्यस्य संसार-

In Public domain. Digitization Muthulakshmi Research Academy

वर्तम्, व्याडेः'उत्पलिनी' इत्यादयः कोशाः आरम्भे आसन्निति किन्तु एतावत्पर्यन्तमेते नोपलब्धाः इति साहित्येतिहासकारैः स्पष्टीकृतम्।

अपि च राघवकविना कृते एकाक्षरनामकोशसङ्ग्रहे

विश्वप्रकाशो गोपालः शेषकरो धनञ्जयः।
शब्दार्णवो वैजयन्ती सूर्यौरुद्रश्च यादवः।।
प्रतापो भागुरिर्दण्डी रसभश्च हलायुधः।
सुभूतिर्हरविष्णू च वररुच्यमलोत्पलाः।।
अजयः शाश्वतश्चैते उच्यन्ते पण्डितैः पुरा।।

इत्यादिभिः श्लोकैः प्रायः द्वाविंशति कोशकाराणां नाम निर्दिष्टमस्ति। एवमेव सुबन्धुकवेः वासवदत्तायाः व्याख्याकारेण नारायणदीक्षितेनापि विंशतिकोशग्रन्थाः उदाहृताः सन्ति। परन्तु संस्कृतवाङ्मये उपलब्धेषु कोशग्रन्थेषु अमरसिंहेण कृतः अमरकोश एव प्रथमः सर्वोत्कृष्टश्चेति सर्वैरङ्गीकृतः। नामलिङ्गानुशासनमिति अन्येनापि नाम्ना प्रसिद्धोऽयं शास्त्रीयं पद्धतिमनुसृत्य रचितः। अनेनैव हेतुना विश्वे सर्वत्र सर्वैः विपश्चिद्भिःएवं च संस्कृताध्येतृलोकेन चास्याध्ययनं क्रियते। पारम्परिक विद्यालयेषु तु अनिवार्यरूपेण अमरकोशस्य सर्वस्य कण्ठस्थीकरणक्रिया इदानीन्तनकालेऽपि दृश्यत इत्यतः ज्ञायतेऽस्य कोशस्य महत्त्वम्।अन्यच्चास्य ग्रन्थस्य वैशिष्ट्यमस्ति यदस्य ग्रन्थस्य प्रायः पञ्चाशद् व्याख्यानानि विरचितानि सुधीभिः।

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमशताब्दीयः पुरुषोत्तमदेवः 'त्रिकाण्डशेष' नाम्ना अमरकोशस्य कृते परिशिष्टं ग्रन्थमेकं व्यरचयत्। अस्मिन् ग्रन्थे पालिभाषायाः प्राकृतभाषायाश्च पदान्यपि निर्दिष्टानि। अत्र अष्टशतं श्लोकाः वर्तन्ते। पुरुषोत्तमदेवेनानेन 'हारवलिः' नामकः कोशोऽपि रचितः। अत्र 270 श्लोकेषु प्रथमभागे पर्याय वाचकपदानि द्वितीये नानार्थाः निरूपिता इति वदन्ति विद्वांसः। अपि च अमरसिंहस्य समकालिक इति ख्यातः शाश्वतः अष्टशतैः श्लोकैः 'अनेकार्थसमुच्चयः' इत्याख्यं कोशमरचयत् ।

राष्ट्रकूटराजस्यास्थानपण्डितः दशमशताब्दीयः हलायुधपण्डितः'अभिधानरत्नमालाम्' निबबन्ध। ग्रन्थोऽयन्तु 'हलायुधकोश' इति नाम्ना प्रसिद्धः संस्कृतवाङ्मये। एनमनुसरन् दाक्षिणात्यः एकादशशताब्दीयः यादवप्रकाशाचार्यः अष्टकाण्डात्मकं वैजयन्तीकोशं व्यरचयत्। अमरकोशवत् अयमपि कोशः शास्त्रनियममनुसृत्यैव कल्पितः। पर्यायभागः. नानार्थभागः, इत्याभ्यां द्विधा विभक्तोऽयं कोशग्रन्थः। पर्यायभागे स्वर्गअन्तरिक्षभूम्यादिपञ्चकाण्डाः, द्वितीये नानार्थभागे द्व्यक्षर- त्र्यक्षर-शेष इति त्रयः काण्डाः वर्तन्ते ।

शब्दानुशासनकर्ता प्रसिद्धो वैयाकरणः हेमचन्द्राचार्योऽपि 'अभिधानचिन्तामणि''नाममाला''अनेकार्थसङ्ग्रहः', 'निघण्टुशेषः', 'देशीनाममाला' इति चतुरः कोशग्रन्थान्

In Public domain. Digitization Muthulakshmi Research Academy

अरचयत्। अस्य देशीनाममालायां द्राविड अरब्बीय फारसीय भाषासम्बन्धिनः शब्दा अपि सन्ति ।

इतः परम् अग्निपुराणेऽपि कोशसङ्कलनं दृश्यते। किन्तु अमरकोशस्य परिवर्तितं रूपमिदमिति विपश्चिदामाशयः। स्वर्गपातालादिवर्गः, अव्ययवर्गः, नानार्थवर्गः, इत्यादिभिः अग्निपुराणस्य शब्दकोशः अमरकोश इव प्रतिभाति। एतदनन्तरं द्वादशशताब्दीयः मङ्खः अमरकोशस्य सरणिमनुसृत्य 'अनेकार्थ-कोशम्' तत्सामयिक एव अजयपालपण्डितः1007 श्लोकैर्युक्तं 'ननार्थसङ्ग्रहम्' दशरूपककर्ता धनञ्जयः 'नाममालाख्यं' कोश-ग्रन्थं च निबबन्धुः।

एनामेव संस्कृतवाङ्मयस्य भव्यां कोशरचनापरिपाटीम् अनुसृत्य केचन विद्वत्कवयः द्विरूपकोशग्रन्थान् विनिर्ममुः। संस्कृतवाङ्मये वैदिकसाहित्ये एवं च लौकिकसाहित्येऽपि ऋषिभिः अनेकैः कविभिश्च एकार्थबोधका एव शब्दाः किञ्चित् परिवर्त्यतत्तत्सन्दर्भेषु उपयुक्ताः। तादृशशब्दानां प्रयोगे पुनः कवीनां कृते अध्येतृणां च कृते सन्देहादिकं नस्यादिति धिया विदुषामुपयोगाय द्विरूपकोशाः विरचिताः। तेषु नैषधकाव्यस्य कर्तुः श्रीहर्षस्य पुरुषोत्तमदेवस्य द्विरूपकोशौ अन्यतमौ। अत्र भट्टोजीदीक्षितस्य 'शब्दभेदप्रकाशः', महेश्वरसूरेः 'शब्दभेदः', शुकदेववर्मणः 'द्विरूपकोशः'इत्यादयश्च वाङ्मये प्रसिद्धाः सन्ति।

श्रीहर्षस्तु

In Public domain. Digitization Muthulakshmi Research Academy

क्वचिन्मात्रकृतो भेदो क्वचिद्वर्णकृतोऽपि च ।
क्वचिद्विभक्तिभेदैश्च शब्दानां रूढितः क्वचित् ।।

इत्यादिना द्विरूपकोशस्य प्रयोजनं स्पष्टयकरोत्। अनेनेदमवगन्तुं शक्यते यत् तत्तत्सन्दर्भेषु किञ्चित्परिवर्तनेन द्विधा प्रयुक्तस्य शब्दस्य अर्थभेदो न भवति। तद्द्रढीकर्तुमेव कवयः द्विरूपकोशग्रन्थानपि विरचितवन्तः।

इदानीं संस्कृतपरिषदा प्रकाश्यमाने अस्मिन् द्विरूपकोशसङ्ग्रहे मूलेनसाकं शब्दानां सूच्यपि सुस्पष्टं दत्तमस्ति। अनुसन्धातॄणांजिज्ञासूनां कवीनाञ्च कृते कोशग्रन्थोऽयं महते उपयोगाय भवतीत्यत्र न सन्देहः।

अमुं ग्रन्थं परिशील्य संशोध्य अकाडमी पक्षतः मुद्रापयितुं कृतश्रमः निरन्तरं परिशोधनरतः डा. जोशी सन्तोषकुमारः, शोधसहायकः बहुधा अभिनन्दनीयः।

एतादृशविशिष्टग्रन्थान् अकाडमी पक्षतः प्रकाशयितुमवकाशं कल्पितवद्भ्यः श्रीमद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिवर्येभ्यः. अचार्य परमेश्वरनारायणशास्त्रिवर्येभ्यः, एवञ्च संस्थानस्य कुलसचिवमहोदयेभ्यः आचार्य सुब्रह्मण्यशर्ममहोदयेभ्यश्च धन्यवादान् वितरामि ।

आचार्य के. नीलकण्ठम्

निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

भाषायाः अधिगमे कोशस्य प्राधान्यमधिकं वर्तते। कोशवानाचार्यः इत्यार्योक्त्या ज्ञायते कोशस्य आवश्यकता। संस्कृतवाङ्मये कोशानां संख्या अधिकैव। नानार्थकोशाः, पर्यायपदकोशाः, एकाक्षरकोशाः इत्येवं रीत्या विभिन्नकोशाः लभ्यन्ते। अस्यां परम्परायां द्विरूपकोशाःअपि अस्मिन् वाङ्मये लभ्यन्ते।

साम्प्रतं संस्कृतअकाडमीद्वारा प्रकाश्यमान द्विरूपकोश-सङ्ग्रहग्रन्थे कोशत्रयं सङ्कलितम् वर्तते। एकः नैषधकारेण श्रीहर्षमहाकविना विरचितः द्विरूपकोशः, द्वितीयस्तु पुरुषोत्तमदेवविरचितः द्विरूपकोशः। तृतीयञ्च अस्यैवापरः द्विरूपकोशः (शब्दभेदप्रकाशः)।

श्रीहर्षमहाकविः

संस्कृतवाङ्मये सुप्रसिद्धः महाकविः श्रीहर्षः। श्रीहर्षस्य परिचयः स्वयं कविना नैषधीयचरिते एवं खण्डनखण्डखाद्यादि ग्रन्थेषु निर्दिष्ट आधाराः एवं दृश्यन्ते -

श्री हर्षो कविराजराजमकुटालङ्कारहीरःसुतः
श्री हीरः सुषवे जितेन्द्रियचयं मामल्लदेवी च यम्। नै.1.145

In Public domain. Digitization Muthulakshmi Research Academy

"ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्"।

खण्डनखण्डखाद्यम्

परं द्विरूपकोशमातृकायां तु आधारश्लोकः एवं प्रकारेण दृश्यते।

इत्थं सत्कविराजराजमकुटालङ्कारहीरायित
श्रीहीरात्मभवेन नैषधमहाकाव्योज्ज्वलत्कीर्तिना।
उद्धृत्तप्रतिवादमस्तकतटीविन्यस्तवामाङ्घ्रिना
श्रीहर्षेणकृतं चिरं विजयतां श्रीकोशरत्नं महत्।।

एभिः प्रमाणैःअस्य महाकवेः पिता श्रीहीरः माता च मामल्लदेवी आस्ताम्। एवमेव कन्याकुब्जेश्वरस्य जयचन्द्रस्य आस्थानपण्डितरूपेणासीदिति, एवमेव कवेरस्य कालः द्वादश शतकोत्तरार्धभाग इति च उपर्युक्तप्रमाणैः ज्ञायते। कविनानेन नैके ग्रन्थाः रचिताः।ते च

स्थैर्यविचारप्रकरणम्, विजयप्रशस्तिः, खण्डनखण्डखाद्यं, गौडोर्वीशकुलप्रशस्तिः, अर्णवर्णनम्, छिन्दिप्रशस्तिः, शिवशक्तिसिद्धिः, नवसाहसाङ्कचरितचम्पूः, नैषधीयचरितम् द्विरूपकोशः इत्यादयः ।

पुरुषोत्तमदेवः- अमरकोशपरिशिष्टरूपस्य त्रिकाण्डशेषस्य कर्ता पुरुषोत्तमदेवःवङ्गदेशीयः, हलायुधवंशोत्पन्नः त्रयोदशशतकस्योत्तरार्धकालीन इति ज्ञायते। अनेन महाशयेनहारावली,

In Public domain. Digitization Muthulakshmi Research Academy

एकाक्षरकोशः, सकारभेदः, जकारभेदः भाषावृत्तिः, शब्दभेद प्रकाशः, द्विरूपकोशः इत्यादि नैके ग्रन्थाःविरचिताः।

श्रीहर्षस्य द्विरूपकोशमातृकाः

Descriptive catalogue of the sanskritmanu-scripts in the Adayar library इत्यस्मिन् ग्रन्थेषष्टभागेक्रमसंख्या 814 तः 820 पर्यन्तं श्रीहर्षकृत द्विरूपकोशाः षट् मातृकाः निर्दिष्टाः।एषु 814 तम मातुकयामेव पुष्पिका एवं कोशपरिचयः दृश्यते। पृष्टसंख्या 338-339।

तत्र कोशस्यारम्भः एवं वर्तते –

प्रबोधमाधातुमशाब्दिकानांकृपामवाप्तुं रचितो विचार्य।
द्विरूपकोशो रचितो विचार्य बहुप्रबन्धस्थितशब्दभेदान् ।।1।।

ज्ञात्वा च पूर्वप्रचुरप्रयोगान् प्रामाणिकोदाहरणानि मत्वा ।
रूपादिभेदेषु विलक्षणेषु विचक्षणो निश्चिनुयात्सुशब्दान्।।2।।

द्विलिङ्गता प्रत्ययहल्जभेदात्सपञ्चकद्वित्रिचतुःप्रकारान् ।
भूम्येकवाचित्वमपीह वाचांश्रीहर्षसूरिर्वितनोति कोशे ।।3।।

क्विचिन्मात्रकृतो भेदः क्वचिद्वर्णकृतोऽपि च ।
क्विचिद्विभक्तिभेदैश्च शब्दानां रूढितः क्वचित् ।।4।।

विद्यादगारमागारमपगामापगामपि ।
अरातिमारातिमथश्रमः श्रामः प्रकीर्तितः।।5।।

In Public domain. Digitization Muthulakshmi Research Academy

भवेदमर्ष आमर्षः अङ्कुरोऽङ्कूर एव च ।
अन्तरिक्षं चान्तरिक्षमगस्त्योऽगस्तिरित्यपि।।6।।

समाप्तिः -

शैवालं शैवलं चापि शैवालः शैवलस्तथा ।
शिवालं चेति रूपाणि पञ्चधा परिकथ्यते ।।
इत्थं सत्वकिराजराजिमकुटालङ्कारहीरायित-
श्रीहर्षात्मभवेन नैषधमहाकाव्योज्ज्वलन्मूर्तिना ।
उल्लुप्रतिवादिमस्तकतटीविन्यस्तवामाङ्घ्रिणा
श्रीहर्षेण कृतो द्विरूपविलसत्कोशः सतां श्रेयसे ।।

अडयार् ग्रन्थालस्य केटलाग् ग्रन्थे निर्दिष्टप्रकारेण एतासु षट्सु मातृकासु ग्रन्थलिप्यां लिखित मातृकाम् आधारी-कृत्य, तेलुगुलिप्यां कोशोऽयं प्रकाशितः इति ज्ञायते। एवं मुम्बयि , वाराणस्याञ्च कोशोऽयं प्रकाशितः इति च ज्ञायते। कोशगतश्लोकसंख्या 222 इति ज्ञायते ।

प्रस्तुतप्रकाश्यमानग्रन्थस्य आधारभूतमातृकाविशेषाः

प्रस्तुत द्विरूपकोशसङ्ग्रहे प्रकाश्यमान श्रीहर्षकृत द्विरूपकोशः ओद्दिराजु सोदरुलु इति नाम्ना प्रसिद्धौ सोदरौ ओद्दिराजु सीतरामचन्द्ररावः, ओद्दिराजु राघवरंगारावः।आभ्यां लिखितप्रतिः एतयोः परिवारजनः आचार्य मुरलीधररावःपरिषदे

In Public domain. Digitization Muthulakshmi Research Academy

दत्तवान्। तां लिखितप्रतिम् आधारीकृत्य साम्प्रतं ग्रन्थोऽयं प्रकाश्यते ।

अस्यां मातृकायां श्लोकाः न सन्ति। केवलं पदसूची एव वर्तते। सूच्यां श्लोकगत पूरकपदानि सन्ति। तान्याधारीकृत्य श्लोकाः ग्रथिताः। पुष्पिकां विहाय तेषां संख्या 253।

मुम्बयि, एवं वारणास्यां च तेलुगुलिप्यां प्रकाशितग्रन्थ श्लोकसंख्या 222,परं प्रस्तुतग्रन्थश्लोकसंख्या 253 अतः अनयोः द्वयोः ग्रन्थयोःश्लोकसंख्ययोः भेदः दृश्यते ।

द्वितीयः द्विरूपकोशः–पुरुषोत्तमदेवः

अयं च द्विरूपकोशः पुरुषोत्तमदेवविरचितः। अयं च कोशः अभिधानसङ्ग्रहनामके संस्कृतप्राचीनकोशग्रन्थसमुच्चये प्रथमखण्डे 1889 तमे वर्षे निर्णयसागराख्ययन्त्रालये प्रकाशितः। ततः द्वादशकोशसङ्ग्रहे 1929 तमे वर्षे प्रकाशितः। अस्मिन् कोशे सप्तपञ्चाशत् श्लोकाः सन्ति। आहत्य पदानां संख्या 571। अस्मिन् कोशे न केवलं द्विरूपपदानि अपि तु त्रिरुपानि एवं चतूरूपानि पदानि दृश्यन्ते तानि च

1. खाल्विटः-खल्विटः- खल्लीटः- 65/66
2. धुपित्तं- धूपितं-धूपायितं -36
3. पणायितं -पणितं- पनितं -पनायितम् –38
4. बह्वाम्पि - बह्वम्पि - बह्वापा –55

In Public domain. Digitization Muthulakshmi Research Academy

5. भूमिः-रजनिः- अवनिः - 11
6. लुपः- लोलुपः- लोलुभः- 53

तृतीयःद्विरूपकोशः(शब्दभेदप्रकाशः)-पुरुषोत्तमदेवः

पुरुषोत्तमदेवस्यैवअपरः द्विरूपकोशः। कोशेऽस्मिन् सप्तपञ्चाशत् श्लोकाः सन्ति। कोशोऽयं द्वादशकोशसङ्ग्रहे1929 तमे वर्षे प्रकाशितः।तत्र पुष्पिका एवं वर्तते- "इति पुरुषोत्तमदेवकृतः शब्दभेदप्रकाशः सम्पूर्णः"।

इतरे द्विरूप-शब्दभेदकोशाः

संस्कृतवाङ्मये अन्ये बहवः द्विरूपकोशाः सन्तीति, एन्.सि.सि. ग्रन्थाधारेण ज्ञायते। ते च कोशाः

1. शब्दभेदप्रकाशः -भट्टोजिदीक्षितः,
2. शब्दभेदप्रकाशःमहेश्वरसूरिः, (अयं च ग्रन्थः ज्ञानविमलोपाध्यायप्रणीतटीकयोपेतःसुरतवर्तिश्रीरांदेव रोड, जैन सङ्घद्वारा 2010तमे वर्षे प्रकाशितः)।
3. शब्दभेदः अथवा शब्दरत्नाकरः- साधुसुन्दरगणिकृतः,
4. द्विरूपकोशः- पुरुषोत्तमदेवः,
5. द्विरूपकोशः-शुकदेवशर्मन्। (N.C.C.Volume-9) पृष्टसंख्या209,N.C.C.Volume -12 पृष्टसंख्या 147)

In Public domain. Digitization Muthulakshmi Research Academy

6. द्विरूपकोशः- अज्ञातकर्तुकः N.C.C.Voume-10
पृष्टसंख्या 209,

7. द्विरूपकोशः- श्रीहर्षः - लघुसंस्करणम् अत्र 57 श्लोकाः सन्ति।(संस्कृतकोशशास्त्रोंकीआयाम् - सत्यपालनारंग् पृष्टसंख्या 187)

रुपभेदे अथवा द्विरूपनिर्माणे कारणं किं ?

श्रीहर्षः स्वस्य द्विरूपकोशारम्भे द्विरूपनिर्माणकारणमेवमाह-

किचिन्मात्रकृतो भेदः क्वचिद्वर्णकृतोऽपि च ।
किचिद्विभक्तिभेदैश्च शब्दानां रूढितः क्वचित् ।।4

- केषुचनस्थलेषु मात्रया स्वरव्यञ्जनादिना भेदः। अरामः, आरामः।
- क्वचित् अक्षरैः भेदः वर्णभेदः इत्युच्यते । प्रतिश्याय-पतिश्याय ।
- विभक्तिभेदः
- रूढितः–शिष्टप्रयोगवशात्

महेहेश्वरसूरिविरचित शब्दप्रभेद- ग्रन्थे द्विरूपनिर्माणकारणम् अन्यथा एवमुक्तम्

क्वचिन्मात्रकृतो भेदः क्वचिद्वर्णकृतोऽत्र च ।
क्वचिदर्थान्तरोल्ले-खाच्छब्दानां रूढितः क्वचित् ।।

शब्दप्रभेदः3

In Public domain. Digitization Muthulakshmi Research Academy

- केषुचनस्थलेषु मात्रया स्वरव्यञ्जनादिना भेदः अरामः, आरामः, वर्णैःयः भेदः भवति स वर्णभेदः इत्युच्यते। अवश्यःअवश्यायः, उत्तमंअनुत्तमम् इत्येवं प्रकारेण।
- अर्थान्तरलेखात् भेदः मर्हिरःमुहुरः ।
- रूढितःशिष्टप्रयोगवशात् ।

कोशविशेषाः

श्रीहर्षमहाकवेः द्विरूपकोशे न कवेलं द्विरूपानि अपि तु त्रिरूपानि चतूरूपानि, पञ्चरूपानिपदानि वर्तन्ते।

द्विरूपाः

अराति-आराति 4 आर्यः – अर्यः 14

ऊर्मिः- ऊर्मी 25 कुर्दनं- खुर्दनं 31

त्रिरूपाः

अङ्कणम् - अङ्गणम् - अङ्गणा 185

उदं- उदकं- दकं 189

चतूरूपाः

अग्रं - अग्र्यं- अग्रीयं- अग्रियम् 225

कौतुकं- कुतुकं- कौतूहलं - कुतूहलं 228

पञ्चरूपाः

कंडूयनं-कूंडूया- कंडूः -कंडूती- कंडुती 249

लोलुपः- लोलुभः- लोलः- लंपटः- लालसः 252

In Public domain. Digitization Muthulakshmi Research Academy

कोशगतपदानां संख्या

द्विरूपपदानां संख्या	772x2 = 1544
त्रिरूपपदानां संख्या	92x3 = 276
चतूरूपपादानां संख्या	47x4 = 188
पञ्चरूपपदानां संख्या	10x 5 = 50
आहत्य पदानां संख्या	2058

विभिन्नकोशेषु द्विरूपपदानि

पुरुषः पूरुषे साङ्ख्यज्ञे च पुन्नापपादपे ।।

मेदिनी - षान्तः- 41

कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गधिपानके ।।

मेदिनी– षान्तः- 10

कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गधिपानके ।।

मेदिनी– शान्तः- 6

दोषःस्याद्द् दूषणे पापे दोषा रात्रौ भुजेऽपि च।

मेदिनी –षान्तः-15

दयिता, प्रतीपदर्शिनी कान्ता वशा महिला महेला च।

धनंजयनाममाला 32

चञ्चुश्चञ्चूस्तथा त्रोटिर्डयनं गगने गतिः।।

हलायुधकोशः- 240

पुमान्पञ्चजनो ना च पुरुषः पूरुषस्तथा विट् ।

हलायुधकोशः- 331

In Public domain. Digitization Muthulakshmi Research Academy

भुजगभुजङ्गकुम्भीनसपन्नगनागभोगिनः।

हलायुधकोशः –640

पुनर्भवः पाणिरुहो महाराजः पुनर्नवः।

वैजयन्ती 76

पुनर्नवा च रक्तायां तस्यां योग्या कटिल्लका ।
श्वेतायां वृश्चिकोऽल्पायां दीर्घपत्री विटाटिका ।।

वैजयन्ती -149

बन्धूकोऽस्त्री बन्धुजीवे बन्धुकः पीतसालके ।।

शिवकोशः- 38

विभिन्नग्रन्थेषु द्विरूपपदप्रयोगाः

फेरुः –शृगालः

गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः।।

भागवतम् 8-16-7

फेरवः- शृगालः

नृत्यतां तरतां रक्ते नदतां चोत्सवाय सः।
शूराणां फेरवाणाञ्च भूतानाञ्चाभवद्रणः।।

कथासरित्सागरे 47-53

In Public domain. Digitization Muthulakshmi Research Academy

भाषणम् (क्ली)–

भाष् भावे ल्युट्। संलापो भाषणं मिथःइत्यमरः।

हास्यलोभभयक्रोध प्रत्याख्याने निरन्तरम्।

आलोच्य भाषणेनापि भाषयेत् सूनृतं व्रतम् ।।

सर्वदर्शनसंग्रहे अर्हतमतम् ।

भाषा (स्त्री)

भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते इति ।

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।

संस्कृतैः प्राकृतैर्वाक्यैरर्थं शिष्यानुरूपतः।

देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः।

अयं च द्विरूपकोशसङ्ग्रहग्रन्थः संस्कृतप्रेमिणां, भाषाध्येतृणां विशेषतया कवीनाम् अत्यन्तोपयोगकरः भवतीति आशासे।

सुहृज्जनसुधीविधेयः

डा. सन्तोषकुमारः जोशी

In Public domain. Digitization Muthulakshmi Research Academy

उमारमण सुत्राम विरिञ्च्यादि सुराञ्चितम् ।
समस्तविघ्नहन्तारमर्वाणनमहंभजे ।।

द्विलिङ्गताच्प्रत्ययहल्कृतां भिदांसपञ्चकद्वित्रिचतुःप्रकारात् ।
भूमैकवाचित्वमपीहवाचांश्रीहर्षसूरिर्वितनोति कोशे ।।

भवेदन्धुः तथान्धस्यादहिस्त्वहिकोऽपि च ।
भवेदन्धं कबन्धं चाप्यहो आहो प्रकीर्तितः।। ।।1।।

अरेचारेऽस्त्रमास्त्रं स्यादन्त्यश्चान्तोऽश्रुचास्रुवत् ।
आर्द्रमार्द्रंचाभ्रमाभ्रमम्लश्चाम्लः प्रकीर्तितः।। ।।2।।

अट्टश्चाट्टलकश्चस्यादळिराळिश्चकथ्यते ।
आपूपश्चैवपूपश्चस्यादप्पतिरपांपतिः।। ।।3।।

विद्यादगारमागारमपगामापगामपि ।
अरातिमारातिमथो अगस्त्योऽगस्तिरेव च ।। ।।4।।

भवेदमर्ष आमर्षोऽप्यळीकमळिकं तथा ।
अन्वयश्चान्ववायस्यादक्षतिश्चाक्षतं तथा ।। ।।5।।

अध्युष्टं चाप्यध्युशितमभ्यूषोऽभ्युष एव च ।
अप्सरा आप्यप्सरस अगुरुश्चागरुस्तथा ।। ।। 6।।

अवाची स्यादपाची चाप्यररं चाररी तथा ।
अवन्तिश्चाप्यवन्तीस्यादर्गळाचार्गळं तथा ।। ।।7।।

In Public domain. Digitization Muthulakshmi Research Academy

भवेदश्रीलमश्लीलमञ्चलं चाञ्चलं समे ।
शुष्केऽप्यकालमाकालमन्तिकश्चान्तिकापि च ।। ।।8।।

स्यादन्वितं तथाऽन्वीतममिषं चामिषं तथा ।
अवनीचावनिः प्रोक्ताऽजगरोऽजगलो भवेत् ।। ।।9।।

अवमानोऽपमानस्स्यादघमर्षोऽघमर्षणम् ।
अहंकारश्चहंकारो अवहेळावहेळना ।। ।।10।।

भवेदक्षोहिणी चम्वा अक्षौहिण्यपि गीयते ।
अकूपारश्च कूपारोऽटरुषश्चाटरूषवत् ।। ।।11।।

अहंवीरश्च हंवीरो प्यवश्याय स्त्यवश्ययः।
अनड्वाही चानडुही चापतीर्थं पतीर्थवत् ।। ।।12।।

आपोगण्डस्तु पोगण्डोऽपिधानं पिधानकम्।
अवतारश्चावतरोऽवहितं वहितं तथा ।। ।।13।।

अन्तरिक्षंचान्तरीक्षमार्यश्चार्यः प्रकीर्तितः।
आटिरातिर्भवेच्चाहितुण्डिकोऽप्यहितुण्डिकः।। ।।14।।

आशीराश्याजिराजीस्यादाळिश्चाळीच कथ्यते ।
आश्रिरश्रिर्निगदिता स्यादायुस्त्वायुषा सह ।। ।।15।।

आपश्चैवापसातुल्याः स्यादाहतमनाहतम् ।
आतिथ्यं चातिथेयञ्च स्यादावासस्त्ववासवत् ।। ।।16।।

In Public domain. Digitization Muthulakshmi Research Academy

आवालमालवालञ्च स्यादालस्योऽलसोऽपि च ।
आलापस्यादालपनमाप्लावश्चाप्लवस्तथा ।। ।।17।।

आमिक्षास्यादमिक्षा चाप्यासान्यास्थानमित्यपि ।
आश्रयाशोप्याश्रयाशो भवेदान्वीषकीतथा ।। ।।18।।

आन्वीक्षकी समौ चारग्वधाऽरागवधौ स्मृतौ ।
स्यातामाकारणाकारा विष्टमीष्टमपिस्मृतम्।। ।।19।।

इन्दिरास्यात्तथेन्दीरा पिंगुदीचेंगुदोऽपि च ।
इषिकास्यादिषीका च स्यादीषेशा तथैव च ।। ।।20।।

ईश्वरी चेश्वराचस्यादुतमूतमपिस्मृतम् ।
उक्थमुक्थ्यमपिप्रोक्तमुषाप्यूषानिगद्यते ।। ।।21।।

उल्मूकमुल्मुकं प्राहुरुषणं तूषणं तथा ।
उषरं स्यादूषरञ्च स्यादुदारोऽनुदारवत् ।। ।।22।।

उत्तमोऽनुत्तमश्चस्यादुदग्रश्चानुदग्रवत् ।
भवेदुत्थानमुत्तानमुर्वशीचोर्वसी तथा ।। ।।23।।

भवेदुल्लोच ऊल्लोच उन्नायश्चोन्नयस्तथा ।
उशीरोऽप्युशिरश्चस्यादुच्छ्रायोप्युच्छ्रयस्तथा ।। ।।24।।

उन्दुरुश्चाप्युदीरुस्यादुदूखलमुलूखलम् ।
ऊर्मिश्चोर्मीतथोरुस्यादूरूऋश्यश्चऋष्यवत् ।। ।।25।।

 Public domain. Digitization Muthulakshmi Research Academy

ऋषिश्चापि ऋषीचस्यादृभूकऋभुकस्तदा।
ऋश्यप्रोक्ता ऋष्यप्रोक्ताप्येथमाहुस्तथेधसा ।। ।।26।।

ऐलबिलश्चैडबिडऔशीरं चौशिरं तथा ।
कंगुःकंगूश्च कथिता कोषःकोश कषा कशा ।। ।।27।।

क्रिमिःकृमिस्तथा कर्षः करिषस्याकुथः कुथा ।
भवेत्कक्ष्या च कक्षा च क्रोडा क्रोडं प्रकीर्तितम् ।। ।।28।।

केळी केळिरपिप्रोक्ता काषं काशं प्रचक्षते ।
भवेत्कुणिश्च कूणिश्च कारूः कारुरपिस्मृतः।। ।।29।।

भवेत्कलिश्च कलिका कुपः कूपः प्रकीर्तितः।
क्लिष्टं क्लिशितमप्याहुः क्रीतं क्रीणं प्रकीर्तितम् ।। ।।30।।

कहली काहली चस्या त्कुमुदं कुमुदोऽपि च ।
कवाटं च कपाटं च कुर्दनं खुर्दनं समम् ।। ।।31।।

कलशः कलसश्चैव कृशरः कृसरोऽपि च ।
कर्मीणोऽपि च कर्मीरः कुबरः कूबरोऽपि च ।। ।।32।।

कुद्दालश्च कुदालश्च करिण्यां कारिणीति च ।
कुशलं कुसलं चापि कोसलोत्तरकोसला ।। ।।33।।

कपोणिः कपणिश्चापि किलिञ्जिश्च किलिञ्जिकः।
ककुदं ककुदस्याहुःकटकं कटकस्तथा ।। ।।34।।

कमलं कमलोवापि कर्षकः कृषकोऽपि च ।
कंदळं कंदळी च स्यात्कदली कदलस्तथा ।। ।।35।।

कंखणश्चापि कंखाणः कोंकणश्चापि कोंकणः।
किम्मीरोपि किम्मीरस्यात् काकणी काकणिस्तथा ।। ।।36।।

कंधरा कंधरश्चस्यात् करम्भश्च करम्भया ।
कुर्कुरः कुक्कुरोऽपिस्यात् कुसुमं सुम इत्यपि ।। ।।37।।

कर्बुरश्चापि कर्बूरः करकः करकापि च ।
कराटश्च कराटिश्च किलिनी किलणी तथा ।। ।।38।।

कमनः कामनश्चापि केसरो नागकेसरः।
करेटुः कर्करेटुश्च कोरकं कोरकोऽपि च ।। ।।39।।

कल्माषश्चापि कल्मासः करीटं च किरीडवत् ।
किसरः केसरश्चस्यात् करटश्च कटस्तथा ।। ।।40।।

कृपटंच कृपीटञ्च करभोऽपि करंभकः।
कंदरः कंदरा च स्यात् कैकेयी केकयीति च ।। ।।41।।

करवालः करपालः किकिदीविः किकीदिविः।
कौलटेयः कौलटेरः कृष्णशारो भवेत्तथा ।। ।।42।।

कृष्णसारः कराटीन कलाटीनौ समौस्मृतौ ।
कालनेमिः कालनेमी भवेत्कौमुदकी तथा ।। ।।43।।

In Public domain. Digitization Muthulakshmi Research Academy

कौमोदकी कान्यकुब्जं कन्याकुब्जमपि स्मृतम् ।
खड्गं खड्गः खनी च स्यात् खनिः खेदश्च खेदनम्।। ।।44।।

खरास्यात् खलिकाचापि खुरकः क्षुरकस्तथा ।
खलिनं च खलीनञ्च क्षुरप्रस्यात् क्षुरप्रकः।। ।।45।।

खण्डपर्शुः खण्डपरशुः गुप्तं गोपायितं तथा ।
गूढं गूढो गुरुर्गुर्वी गृध्नुर्गध्नन इत्यपि ।। ।।46।।

गर्तो गर्ता गिरा गीश्च गृहाश्च गृहमुच्यते ।
गवी गौश्च ग्रसो ग्रासो गोदा गोदावरीत्यपि ।। ।।47।।

गन्धो गंधा ग्रहो ग्राहः गुंभो गुंभनमुच्यते ।
गंधर्वोऽपि च गान्धर्वो गाण्डीवं गांडिवं तथा ।। ।।48।।

गुग्गुलूर्गुग्गुलोऽपिस्यात् गंभीरं च गभीरवत् ।
गारुडो गरुडश्चस्यात् ग्रथितं ग्रंथितं समे ।। ।।49।।

ग्रथनं ग्रन्थनंचापि भवेद्गोनासगोनसा ।
गरळं गरमप्याहुर्गणना गणनं तथा ।। ।।50।।

गिरीशो गिरिशश्च स्यात् गिरितं गळितं समे ।
गोधिकाचापि गुधिका गीर्वाणो गीर्वणोऽपि च ।। ।।51।।

गन्धवाहो गन्धवहो गंडभेरुंडवत्स्मृतः।
भेरुण्डश्चाथ घटवत् घटीचापिप्रकीर्तिता ।। ।।52।।

घ्राणं घ्रातमपिप्रोक्तं घटीच घटिका तथा ।
घनो घनाघनश्चापि चंचुश्चञ्चूः प्रकीर्तिता ।। ।।53।।

चोरि श्चौरिश्चटुश्चाटु श्चोलश्चौलश्चमुश्चमूः।
चेटिश्चेटी चरश्चारः चव्यञ्च चविकेत्यपि ।। ।।54।।

चितिश्चापि चिता चेष्टा चेष्टश्चूडा च चूडवत् ।
चंडालोपि च चांडाल श्चमसश्चामसस्तथा ।। ।।55।।

चरित्रं चरितं चापि चुलूकं चूलकं तथा ।
चिन्तनी चिंतनं चापि चमरुश्च चमूरुवत् ।। ।।56।।

चेकुरः चिकुरश्चापि चपलं चापलं तथा ।
चटूकं चटुकं प्रोक्तं चञ्चलं चलमित्यपि ।। ।। 57।।

चिपुटश्चिपुटिश्च स्यात् चातुर्यं चातुरीति च ।
चक्राङ्गी चापि वक्राङ्गी चतुरश्चातुरस्तथा ।। ।।58।।

चरणं चरणश्चस्यात् चिरत्नञ्च चिरन्तनम् ।
चणसूत्रं भवेदेव शणसूत्रमपिस्मृतम् ।। ।।59।।

छदश्च च्छदनं छन्नं छादितं स्यात् जरा जराः।
ज्येष्ठो ज्यैष्ठो जपो जापो जोषा योषा जडं जलम् ।। ।।60।।

ज्योत्स्ना ज्योत्स्नी तथा प्रोक्ता जाया यायापि कीर्तिता ।
जिह्वा जिंहापि कथिता जृम्भा जृम्भणमित्यपि ।। ।।61।।

In Public domain. Digitization Muthulakshmi Research Academy

जतुकास्याज्जतूकापि ज्योतिषं ज्यौतिषं तथा ।
जठरो जटरश्चस्याज्जटायुश्च जटायुषा ।। ।।62।।

जामाताापि च यामाता जटीलो जटिलोऽपि च ।
जांबवान् जंबवोऽपिस्याज्जंबूरो जम्बुकोऽपि च ।। ।।63।।

जीवनं जीवनाचापि जरायुस्स्याज्जरायुषा ।
जयनं च जयश्चापि झर्झरो जर्झरस्तथा ।। ।।64।।

जतुकञ्च जतुप्रोक्तं जवनञ्च जवस्तथा ।
झल्लरी झल्लरिश्चापि डंबो दंबो ढुली धुली ।। ।।65।।

डिंडीरो डिंडरोऽपिस्यात् ढक्कि ढक्का च कथ्यते ।
तलस्तालस्तृषा तृष्णा तालस्ताडस्तनुस्तनूः।। ।।66।।

तोकं तोकस्त्वचा त्वक्क तन्द्री तन्द्रा तुषस्तुषः।
तप्तं च तपितं त्रातं त्राणं चापि तटी तटम् ।। ।।67।।

तिष्यस्त्रिष्यस्त्विषात्विड्व तारा तारमपि स्मृतम् ।
तपश्च तपसा प्रोक्ता तमश्च तमसा तथा।। ।।68।।

तुङ्गंतु तुगमप्याहु सैमस्तेम स्तटित्तडित् ।
तपिञ्छमपि तापिञ्छं तरुणी तलूनीति च ।। ।।69।।

त्रापुषं त्रापुषश्चस्यात् त्रिणता त्रृणितापि च ।
तारकं तारकाचापि त्र्यम्बकश्च त्रियम्बकः।। ।।70।।

तमिस्रं च तमिस्रा स्यात् तिमिरं तिमिरस्तथा ।
तपनस्तापनोऽपिस्यात्तामसी तामसं तथा ।। ।।71।।

तिमितं स्तिमितं चापि तिलिप्सस्यात्तिलित्सवत् ।
तरणिस्तरणी चापि तुवरस्तूवरोऽपि च ।। ।।72।।

तनूरुहं तनुरुहं तामलिप्ताभवेत्तथा ।
दामलिप्ता तैलपेजः तिलपिञ्जोऽपिच स्मृतः।। ।।73।।

दोर्दोषा द्यौर्दिवं प्रोक्तं द्वार्द्वारमपि कथ्यते ।
दृग्दृशा च तथा दूती दूतिर्दासश्च दाशवत् ।। ।।74।।

दांतं च दमितंचापि दिष्टिर्दिष्टिरपिस्मृता ।
भवेद्दवश्च दावश्च दोला डोला च कथ्यते ।। ।।75।।

स्याद्दाराचापि दाराश्च दूत्यं दौत्यमपिस्मृतम् ।
द्रोणी दोणी च दासेर दासेयौकथिताविमौ ।। ।।76।।

दम्पती जम्पती चापि दूषणा दूषणं तथा ।
द्युसदस्स्युर्दिविषदो द्रुहीणो द्रुहिणस्तथा ।। ।।77।।

दाडिमी दाडिमश्चापि दारिद्रश्च दरिद्रवत् ।
ध्वांक्षो द्वांभो धुतं धौतं धनी धनिक एव च ।। ।।78।।

धूम्रश्च धूमलश्चापि धृष्टो धृष्णुरपिस्मृतः।
भवेद्धम्मिल्ल धम्मेल्लौ धवित्रं स्याद्दवित्रकम्।। ।।79।।

In Public domain. Digitization Muthulakshmi Research Academy

धूपायितं धूपितं च नगश्च नगसा समः।
नाभी नाभिनिशा निद्व नृत्तं नृत्यञ्च कथ्यते ।। ।।80।।

नयश्च नयनं चापि नतं चानतमित्यपि ।
ननंदा च ननांदा च निमेषो निमिषोऽपि च ।। ।।81।।

नीलंगुरपि नीलाङ्गुर्नारको नरकस्तथा ।
निशीतं निशितश्चापि नटनं नाटनं तथा ।। ।।82।।

निलयश्चालयश्चापि निकृत्तिर्निकृतिस्तथा ।
नारङ्गमपि नार्यङ्गं नगरी नगरं तथा ।। ।।83।।

निचकी नैचकीचस्यान्निगदश्च निगादवत्।
निर्ऋतिर्नैर्ऋतिश्चापि निक्वाणो निक्वणस्तथा ।। ।।84।।

नेदिष्टोऽपिच नेदीया न्निनदश्च निनादवत् ।
भवेन्नियंता यंता च निहाकानिहकापि च ।। ।।85।।

नैवेद्यं च निवेद्यं च निकुञ्जः कुञ्ज एव च ।
नडमीनो नलमीनो नारायण नरायणौ ।। ।।86।।

नीराजनं तथा नीराजनाच परिकीर्तिता ।
प्राग्र्यः प्राग्रसरश्चापि पङ्गुः पङ्गूश्चकथ्यते ।। ।।87।।

पृश्निश्च पृश्निपर्णी च प्रावृट् प्रावृषया सह ।
पर्शुश्च पर्शुका चापि प्लिहा प्लीहागदेऽपि च ।। ।।88।।

In Public domain. Digitization Muthulakshmi Research Academy

पुष्यः पौषस्तथा पूर्णं पूरितं च प्रकीर्तितम् ।
पिष्टं च पिषितं प्रुष्टं प्लुष्टञ्चापि पविर्भविः।। ।।89।।

प्रायश्च प्रायसा तुल्यः पर्घस्स्यात् परिघस्तथा ।
पुरश्च पुरतः प्रोक्तं पथः पंथाश्च कथ्यते ।। ।।90।।

भवेत्पांशुश्च पांसुश्च प्राणाः प्राणोऽपि च स्मृतः।
प्रत्नं प्रतनमप्याहु प्रज्ञः प्राज्ञश्च गद्यते ।। ।।91।।

प्रघाणः प्रघणश्चापि पतङ्गः पतगस्तथा ।
प्राचीनं प्राचीरमपि पालाशश्च पलाशवत् ।। ।।92।।

प्रियालस्यात् पियालश्च परेतः प्रेत उच्यते ।
पत्रङ्गमपि पत्राङ्गं परशस्पर्शमेव च ।। ।।93।।

पूरुषः पुरुषश्चापि परशूः परशुस्तथा ।
प्रततिर्व्रततिश्चापि प्रादेशोऽपि प्रदेशवत् ।। ।।94।।

पिटकः पेटकश्चापि पललं पलमित्यपि ।
पृथुलं पृथु चापि स्यात् प्रग्राहः प्रग्रहोऽपि च ।। ।।95।।

स्यात्पलांडुः पलाण्डुश्च प्रचेताश्च प्रचेतसः।
पल्यङ्किका च पल्यङ्कः प्रक्काणः प्रक्कणोऽपि च ।। ।।96।।

प्रियाळूस्यात् प्रियाळुश्च पाटली पाटला तथा ।
पुळिंदस्यात् पुलिंदोऽपि पृषतः पृषदित्यपि ।। ।।97।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यूषः प्रत्युषश्चापि परिखा परिघासमे ।
पालना पालनं चापि पांसुला पांशुला तथा ।। ।।98।।

भवेत्पतत्रं पत्रं च पाण्डित्यं पाण्डिती तथा ।
स्यात्पल्लवः पल्लविकः पुलकश्च पुलो भवेत् ।। ।।99।।

पोतवाहः पोतवहः पुनर्वसू पुनर्वसुः ।
पारङ्गतं पारगतं पतद्ग्राहः पतद्ग्रहः ।। ।।100।।

पराक्रमो विक्रमश्च प्रतीचीनं प्रतिञ्चनम् ।
पारावतः पारवतः प्रतिश्रायः प्रतिश्रयः ।। ।।101।।

प्रतिकारः प्रतीकारः पृषदश्वभवेदपि ।
पृषदश्यः पृष्पवन्तौ पुष्पवद्भ्यां समौ स्मृतौ ।। ।।102।।

परीसृता परिसृता भवेत्पाटच्चरस्तथा ।
पाटच्चारः परीरंभः परिरम्भो निगद्यते ।। ।।103।।

भवेत्प्रोष्टपदा भाद्रपदा परिमळस्तथा ।
परीमळःपरिवृतः परीवृत अपीरितः ।। ।।104।।

परिहासः परीहासःपारिप्लवपरिप्लवौ ।
प्रतिहारः प्रतीहारो भवेत्पारं परी तथा ।। ।।105।।

पारंपर्यमपिप्रोक्तं फलञ्च पलितं मतम् ।
फेला फेलिरपिप्रोक्ता फुल्लस्संफुल्ल इत्यपि ।। ।।106।।

In Public domain. Digitization Muthulakshmi Research Academy

भवेत्फालंच भालं च फलितं फालितं तथा।
फेरवश्चापि पेरुश्च फुल्गुनः फाल्गुनोऽपि च।। ।।107।।

बुसोऽपि स्यात् बुषश्चापि बाहुर्बाहा बुको बकः ।
बुद्धं बुधितमप्याहुर्बृसीचापि भृषीतथा ।। ।।108।।

भवेद्ब्राह्मी ब्राह्मणी च बाणि बाणो बको बकः।
बोधी बोधिद्रुमश्चापि बर्ही बर्हण उच्यते ।। ।।109।।

बर्हिश्च बर्मिरशुष्मा च बिसं विसमितीरितम् ।
ब्राह्मीको ब्राह्मिकश्चापि बन्धूरं बन्धुरं समम् ।। ।।110।।

बिम्बोष्ठं चापि बिम्बौष्ठं बंधूरं बंधुकं तथा ।
बिब्बोकं चापि बेब्बोकं बहुलं बहुचेत्यपि ।। ।।111।।

बलाकाच वलाकाच बिडौजाश्च बिडौजसः।
बलारिश्च वलारिश्च बिडालश्च बिडारवत् ।। ।।112।।

बान्धवं बन्धुमप्याहुः बलाहक वलाहकौ ।
बीजापूरो बीजपूरो भिन्नं भेदितमित्यपि ।। ।।113।।

भूष्णुर्भविष्णुर्भूमिश्च भूमी च स्यात् भुजा भुजः।
भीरुर्भीरूर्भरो भारः भा भाः भूषा च भूषणा ।। ।।114।।

भृतिर्भृत्या भगो भागो भाषा भाषणमित्यपि ।
भाद्रभाद्रपदौ तुल्यौ भ्राणो भ्रूणः प्रकीर्तितः।। ।।115।।

In Public domain. Digitization Muthulakshmi Research Academy

भगिनी भागिनी चापि भरता भारती तथा ।
भैषज्यं भेषजं चापि भूधरश्च धरोऽपि च ।। ।।116।।

भृङ्गारुश्चापि भृङ्गारो भर्त्सनं भर्त्सना तथा ।
भाण्डीरश्चापि भंडीरो भवेत् भृङ्गरजस्तथा ।। ।।117।।

भृङ्गराजोऽपि कथिते मेधिर्मेधी महिर्मही ।
महश्च महसाप्रोक्तो मृष्टं ख्लिष्टमपिस्मृतम् ।। ।।118।।

मणिर्मणीभवेन्माहो महश्च स्यात् मघो मखः ।
मुस्ता च मुस्तकश्चापि मस्तो मस्तक उच्यते ।। ।।119।।

मुनिश्चस्यात् मुनीचापि मुदुर्मृद्वी तथैव च ।
मसूरो मसुरश्चस्यात् मूसलं मुसलं तथा।। ।।120।।

मद्गलो मुद्गलोऽपिस्यात् मद्गरो मुद्गरस्तथा ।
महिला च महेला च मंदिरं मंदिरापि च ।। ।।121।।

स्यान्मार्गितञ्च मृगितं मार्जनञ्च मृजातथा ।
मृदुलं मुद्रु च प्रोक्तं मञ्जुलं मञ्जुचेत्यपि ।। ।।122।।

मंगल्यमपि मांगल्यं मतल्लिश्च मतल्लिका ।
मकुरो मुकुरश्चापि मंसलो मंसलोऽपि च ।। ।।123।।

मिहीका मिहिकादस्यात् मिहिरो महिरस्तथा ।
मण्डूकश्चापि माण्डूको मकुलो मुकुलस्तथा ।। ।।124।।

In Public domain. Digitization Muthulakshmi Research Academy

मथुरा मधुराचापि मंथरो मंदरस्तथा ।
मर्दळो मद्दळश्चैव मध्यमं मध्य इत्यपि ।। ।।125।।

मृणाळं च मृणाली च मंधनं मधनं समम् ।
मञ्जरिर्मञ्जरी च स्यात् मघवा मघवांस्तथा।। ।।126।।

मार्जालश्चापि मार्जारो मुषितं मुष्टमित्यपि ।
मण्टपो मण्डपश्चापि मासारश्च मसारवत् ।। ।।127।।

मादनश्चापि मदनो मुकुंदः कुंद एव च ।
मलकश्चाप्यामलको मृद्वीका मृद्विकापि च ।। ।।128।।

मार्गशीर्षो मार्गशिरो भवेन्मातृष्वसा तथा ।
मातुस्स्वसा मत्तकाशी मत्तकाशिन्यपि स्मृता ।। ।।129।।

विद्यान्मृगशिरंचापि तथा मृगशिरोऽपि च ।
मणीचकं मणिचकं द्वयंकुसुमवाचकम् ।। ।।130।।

मदावनं मदवनं प्रप्रूर्वं परिकीर्तितम् ।
भवेद्युष्टं च युषितं योत्रं योक्रमपीरितम् ।। ।।131।।

यमश्च यमळश्चापि यमो यामः प्रकीर्तितः।
युक्तं युतमपिप्रोक्तं यौवनं यौवतं तथा ।। ।।132।।

युवती युवतिश्चापि युतकं यौतकं तथा ।
योषितापि भवेत् योषित् योजनं योजना तथा ।। ।।133।।

In Public domain. Digitization Muthulakshmi Research Academy

यजनं याजनं विद्यात् यमुना जमुना तथा ।
यातीफलं जातिफलं यातुधानस्तथास्मृतः।। ।।134।।

जातुधानः तथा रात्री रात्रिश्चापि निगद्यते।
रोदश्च रोदनं चापि भवेत् रागोऽनुरागवत् ।। ।।135।।

भवेद्राजा च राज्ञापि राजी राजिश्च कथ्यते ।
रेखा लेखा भवेत् रीढा लीढा रुङ्व तथा रुषा ।। ।।136।।

रिक्थमृक्थमपि प्राहुर्भवेतां रोमलोमनी ।
रुक् रुजे लोष्ट लोष्टू च रदश्च रदनोमतः।। ।।137।।

रुचको रूचकश्चापि रजसापि रजस्समः।
रजनी रजनिश्चापि रजतं रजितं तथा ।। ।।138।।

रोदस्यौ रोदसी चापि रोहितो लोहितस्तथा ।
रसना रशना चापि रचना रचनं तथा ।। ।।139।।

रिंगणं रिखणं चापि रोहिणी कटुरोहिणी ।
रेखिणी लेखिनी चापि रुषणं रूषणं समम्।। ।।140।।

रोषिका रोशिका रात्रिंचरो रात्रिचरःस्मृतः।
लज्जा लज्या तथा लक्ष्मीर्लक्ष्मी लक्ष्यञ्च लक्षवत् ।। ।।141।।

लक्षं संख्यार्थकं लक्षा लेख्या लेखमपि स्मृतम् ।
लाजो लाजाश्च कथिताः लोध्रं लोत्रं च गीयते ।। ।।142।।

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मणो लक्ष्मणश्चापि लकुचो लकुचस्तथा ।
ललामं च ललामस्यात् लालना लालनं तथा ।। ।।143।।

लोहिनीका लोहितिका लांगलीषा तथैव च ।
लांगलेशा च गदिता व्याडो व्याळः प्रकीर्तितः।। ।।144।।

वल्ली वल्लिर्वणी राणी व्रीडा व्रीडमपिस्मृतः।
वहो वाहो वपिर्व्यापी वर्मी वर्मिक ईरितः।। ।।145।।

वारो वालस्तथा वेशो वोषो वासा च वासकं ।
भवेद्वृष्टिस्तथा विष्टि वेत्रो वेत्रमपिस्मृतम् ।। ।।146।।

वीर्यं वीरायितं चापि विश्वा विश्वापि च स्मृता ।
वेश्या वेष्या च गदिता वंगा वंगः प्रकीर्तितः।। ।।147।।

वज्रो वज्रमपि प्रोक्तं वीती वीतिश्च कथ्यते ।
वार्वारिचापि गदितः वारो वासर इत्यपि ।। ।।148।।

व्रतती व्रततिश्चापि विटंकश्च विडंगवत् ।
वैदेहिश्चापि वेदेही विपाशा च विपाट् तथा ।। ।।149।।

वाचालश्चापि वाचाटः वियामो वियमोऽपि च ।
विश्वसृड्विश्वसृक्क स्यात् वलभी वलभिस्तथा ।। ।।150।।

विफलश्चाऽफलश्चापि वस्नसाऽवस्नसा तथा ।
वास्तुकं चापि वास्तूकं वदान्योऽपि वदन्यवत् ।। ।।151।।

In Public domain. Digitization Muthulakshmi Research Academy

वाल्रूका वालिका चापि बडिशो बलिशोऽपि च ।
वर्षाश्चापि भवेद्वर्षा विषुवं विषुवस्तथा ।। ।।152।।

विश्रामो विश्रमश्चापि वातूलो वातुलस्तथा ।
विकलो विक्लबश्चापि विवश्यो विवशोऽपि च ।। ।।153।।

विवधो वीवधश्चापि विशाणं तु विषाणवत् ।
वासुरा वासुरीतिस्यात् वातको वातकीति च ।। ।।154।।

वारळा वरळा च स्यात् वरणो वरुणो मतः।
वाल्मीकिश्चापि वाल्मीको वलटा वरटा तथा ।। ।।155।।

वल्मिकं चापि वल्मीकं व्यायामो व्याम उच्यते ।
विहारश्चापि वीहारो वहारश्चाऽवहारवत् ।। ।।156।।

विद्धकर्णी विद्धपर्णी वावदूकोऽवदस्तथा ।
विहायसो विहायश्च वामदेवोऽपि वामवत् ।। ।।157।।

वेणीखरा भवेत् वेणीगरावानीपकस्तथा ।
वनीपको वासुदेवो वासुश्चाथ विदारणम् ।। ।।158।।

दारणं चापि कथितं शापः शपनमुच्यते ।
शंडः षंडश्च गदितः शावः सावोऽपि कीर्तितः।। ।।159।।

भवेच्छांतश्च शमितं श्रमः श्रामोपि कीर्तितः।
शुष्कश्च शुष्कितं चापि श्रांतिं श्रांतं प्रचक्षते ।। ।।160।।

In Public domain. Digitization Muthulakshmi Research Academy

शिखा च शिखरं शाटी शाटः शंभूश्च शंभुवत् ।
शंपा संपा शितं शातं शल्कश्च शकलस्तथा ।। ।।161।।

शेलूःशेलूर्भवेत् शोणा शोणी शूंडंच शुंडवत् ।
शंबं सांबं शारसारौ भवेत् शोषश्च शोषणम्।। ।।162।।

शमी शमीरः शंबूकः शंबुकः शरदा शरत् ।
शौंडीर्यमपि शौंडीरं श्यामाकः श्यामकोऽपि च ।। ।।163।।

श्यामालः श्यामलोऽपिस्यात् श्वशुरः स्वसुरस्तथा ।
शरारुश्चापि शारारुः शबलं सबलं तथा ।। ।।164।।

शंबरं संबरंचापि शुष्कलिः शुष्कलोऽपि च ।
शतद्रुश्च शितद्रुश्च शाद्वलः शाड्वलोऽपि च ।। ।।165।।

शालूरश्चापि सालूरः शकुनिः शकुनस्तथा ।
शंबळी शंफलीचैव शाल्मली शाल्मलिर्भवेत् ।। ।।166।।

श्रवणं श्रावणं प्रोक्तं शबरः शाबरस्तथा ।
ष्टेवनं ष्ठीवनं तुल्यं स्फटाचापि स्फटस्तथा ।। ।।167।।

सूचिः सूची स्रवः स्रावः स्वनः स्वानः स्रुतिः श्रुतिः।
सायं सायस्तथा सर्वः शर्वः सूनं प्रसूनवत् ।। ।।168।।

स्यालः श्यालः च कथितः सूरः शूरः सखिः सखा ।
सूरः सूरी सालशालौ सर्पः सार्पः सहाः सहः।। ।।169।।

Public domain. Digitization Muthulakshmi Research Academy

संध्या संधिः सुखं सौख्यं स्पर्शः स्परिश इत्यपि ।
सुरासूरीस्याच्च समः समानः स्तव संस्तवः।। ।।170।।

सिंहाणं चापि सिंघाणं सिंधूरं सिंघुरं मतं ।
सोदर्यः सोदरश्चस्यात् सौहार्दं सौहृदं स्मृतम् ।। ।।171।।

समाख्या च समज्ञा च संकरः सांकरस्तथा ।
संयामः संयमश्चापि संहितं सहितं समे ।। ।।172।।

सृणीका सृणिकाचापि स्फटिकं स्फाटिकं तथा ।
सुत्रामापि च सूत्रामा सूकरः शूकरोऽपि च ।। ।।173।।

सृगालश्च श्रुगालश्च सांकर्यं संकरोऽपि च ।
सततं संततंचैव सेवनं सीवनं स्मृतम् ।। ।।174।।

स्तम्बघ्नस्तु स्तंबघनः सवनं सावनं तथा ।
स्वयंभूश्च स्वयंभुश्च साहस्रं च सहस्रवत् ।। ।।175।।

सीमन्तमपि सीमंतः साहित्यं साहिती तथा ।
सुमनास्स्यात् सुमनः समीकं समिकं तथा ।। ।।176।।

सर्षपस्स्यात् सरिषपः सुधर्मा च सुधर्मणा ।
सत्राचरः सहचरः सुवासिन्याः स्ववासिनी ।। ।।177।।

सुरापाणं सुरापानमथ सालावृकस्तथा ।
भवेच्छालावृकः सांपरायस्स्यात्संपरायवत् ।। ।।178।।

In Public domain. Digitization Muthulakshmi Research Academy

सुनासीरः शुनासीरःस्यात् संवलनमित्यपि ।
तथा संवरणं प्रोक्तं हलंचापि हलस्तथा ।। ।।179।।

हहा हाहा हुहू हुहूः हर्षो हरिष इत्यपि ।
हृष्टं च हृषितं चापि हेषा ह्रेषा हनुर्हनूः।। ।।180।।

हनूमान् हनुमांश्चापि हयनं हायनं मतम् ।
हिंडिरोऽपि च हिंडीरः हविषा हविरुच्यते ।। ।।181।।

हारीतो हरितोऽपि स्यात् हिङ्गुलूश्चापि हिङ्गुलम् ।
हज्जलो हिज्जलोपि स्यत् ह्रीबेरं हरिबेरवत्।। ।।182।।

हलीषा च हलेशा च हंजीरा हंजिकापि च ।
हरितश्च हरिच्चापि ह्लादिनी ह्लादिनीति च ।। ।।183।।

भवेत् क्ष्वेळस्तथा क्ष्वेडः क्षमः क्षामः प्रकीर्तितः।
स्यात् क्षुत् क्षुतमपि प्रोक्तं क्षिरिका क्षीरिकापि च ।। ।।184।।

त्रिरूपम्

आङ्कणं चाङ्गणं च स्यादङ्गणाचापि कीर्तिता ।
अरतिश्चापि निरतिःद्विरतिश्चसमंत्रयम् ।। ।।185।।

अवतंसोऽवतंसोस्यादुत्तंसः परिकीर्तितम् ।
अलकं चालकः केशे स्त्र्यलका श्रीदपत्तनम्।। ।।186।।

द्विरूपकोशः
In Public domain. Digitization Muthulakshmi Research Academy

अध्वनीनोऽप्यध्वगश्चाप्यघ्वन्यश्च प्रकीर्तितः।
भवेदाषाढ आशाढोऽप्याषाढक इति त्रयम् ।। ।।187।।

आंबोळिकास्यादंदोळोऽन्दोळिका च निगद्यते ।
उररीकृतमित्येतदूरीकृतमुरीकृतमूरीम्।। ।।188।।

उदंस्यादुदकंचापि दकं च परिकीर्तितम् ।
भवेदेडुकमेडूकमैडुकं न्यस्तकीकसम् ।। ।।189।।

कटीरश्च कटीचापि कटिश्चापि निगद्यते ।
कबरः कबरिश्चापि कबरीचापि कथ्यते ।। ।।190।।

कर्पटश्च पटश्चापि पटीचापि प्रकीर्तिता ।
काडंबश्च कडंबश्च कलम्बश्च प्रकीर्तितः।। ।।191।।

कुटीरश्च कुटीचापि कुटिश्चापि निगद्यते ।।
केशपक्षः केशपाशः केशहस्तोऽपि च स्मृतः।। ।।192।।

कञ्चुळीकः कञ्चुळिकः कञ्चूळूकः प्रकीर्तितः।
करजश्च करंजश्च कंरंजक इति स्मृतः।। ।।193।।

कविलं कपिलंचापि कापिलं च समं स्मृतम् ।
कुपरः कूपरश्चैव कूर्परश्चापि कीर्तितः।। ।।194।।

खुरळीस्यात् खुरळिका खुरलश्च प्रकथ्यते ।
गौधारश्चापि गौधेरो गौधेय इति कथ्यते ।। ।।195।।

In Public domain. Digitization Muthulakshmi Research Academy

गीर्पतिर्गीष्पतिश्चस्याद्गीःपतिः परिकीर्तिता ।
चंद्रिका चंदिमा चापि चान्द्री च परिकीर्तिता ।। ।।196।।

चिलचीमश्चिलीचीम स्तथा चिलिचिमोऽपि च ।
जानुदघ्नं जानुमात्रं जानुद्वयसमित्यपि ।। ।।197।।

तूणस्तूणी च तूणीर स्त्रयी च त्रितयं त्रयम् ।
तुरगोऽपि तुरङ्गश्च तुरङ्गम इतीरीतः।। ।।198।।

तादृशश्चापि तादृक्क तादृक्षश्चाप्युदाहृतः।
त्रिफला तृफला चापि त्रिफलश्चापि कीर्तितम्।। ।।199।।

द्वयी द्वयं च द्वितयं दिशा दिक् दिश इत्यपि ।
देवकी दैवकी चापि द्वैकी च परिकीर्तिता ।। ।।200।।

दुरितं च दुरीतं च दुरीतश्च निगद्यते ।
समादुत्तूर धुत्तूरा धूत्तूराः कितवेस्मृताः।। ।।201।।

धारुणिर्धारिणीचापि धरणी च प्रकीर्तिता ।
नवं नव्यं नवीनं च नसा नासा च नासिका ।। ।।202।।

निदालं च निटालं च निटलं च प्रचक्षते ।
निपातश्चापि पातश्च निपतः परिकीर्तितः।। ।।203।।

नारिकेळो नाळिकेरो नाडिकेरश्च कथ्यते ।
पूः पुरी च पुरं चापि पांडुः पांडुरपांडरौ ।। ।।204।।

In Public domain. Digitization Muthulakshmi Research Academy

पर्षश्च परिषच्चापि परीषच्चापि कथ्यते ।
पृथिविः पृथिवी च स्यात् पृथ्वी च परिकीर्तिता ।। ।।205।।

पादुका पादुकं पादूरितिसंज्ञात्रयं स्मृतम् ।
पारदा पारदं चापि पारतं च प्रकथ्यते ।। ।।206।।

प्लवगश्च प्लवंगश्च प्लवंगम इति स्मृतः।
पल्यायणं पल्ययणं पल्याणं च निगद्यते ।। ।।207।।

परिवेषः परीवेषः परिवेशः प्रकीर्तितः।
पुरोगमः परोगामी पुरोग इति कथ्यते ।। ।।208।।

पराभवः परिभवः परीभावश्च कथ्यते ।
भ्रमश्चापि भ्रमिश्चापि भ्रमीति परिकीर्तिता ।। ।।209।।

भीरुको भीलूको भीरुः भिदुरं भिदिरं भिदुः।
भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति कथ्यते ।। ।।210।।

भुजगश्च भुजंगश्च भुजङ्गम इति स्मृतः।
भामिनी भामिनिश्चापि भामा च परिकीर्तिता ।। ।।211।।

मंथो मंथाश्च मंथानः मुन्मुदा प्रमुदस्समाः।
मार्तांडश्च मृतांडश्च मार्तण्डश्च प्रकीर्तितः।। ।।212।।

मधूळिका मधूळिश्च मधुचेति प्रकीर्तितम् ।
रती रतं च सुरतं रधिको रधिरो रधी ।। ।।213।।

In Public domain. Digitization Muthulakshmi Research Academy

राक्षा लाक्षा च रक्षा च रभटी भार्भटी भटी ।
लपश्च लापनं चापि लापनश्च निगद्यते ।। ।।214।।

वाग्वाचा च वचश्च स्यात् वृत्तिर्वार्तं च वृत्तवत् ।
भवेद्विघ्नं च विघ्नश्च विघ्नापरिनिगद्यते ।। ।।215।।

भवेद्वृद्धिश्च वृद्धी च वार्धीचेति निगद्यते ।
वलग्नं चावलंग्न च लग्नं च परिकीर्तितम्।। ।।216।।

विरिंचिश्च विरंचश्च विरिंचन इति स्मृतः।
विहगश्च विहङ्गश्च विहङ्गम इतीरितः।। ।।217।।

वळक्षश्च वळाक्षश्च बलक्षश्च प्रकीर्तितः।
वृषभश्च वृषश्चापि ऋषभश्च प्रकीर्तितः।। ।।218।।

वाणिज्यं च वणिज्यं च वणिज्याचापि कीर्तिता ।
शुंडश्च शुंडा च शुंडारः शरदः शारदः शरत् ।। ।।219।।

शर्करा स्यात् शर्करिलः शार्करः परिकीर्तितः।
शकुला शकुलश्चापि शकुली च प्रकीर्तितः।। ।।220।।

शुभदन्ती शुभदती सुदती च प्रकीर्तिता ।
शूरकल्पः शूरदेश्यः शूरदेशीय इत्यपि ।। ।।221।।

सदृक् सदृक्षः सदृशः सुषीरं सुषिरं सुषिः।
स्वप्नश्च स्वपनं च स्यात् स्वापश्चापि प्रकीर्तितः।। ।।222।।

द्विरूपकोशः

In Public domain. Digitization Muthulakshmi Research Academy

सलीलं सलिलं चापि सरिरं चापि कथ्यते ।
सिंधुकः सिंधुवारश्च सिंधुवारक इत्यपि ।। ।।223।।

स्फोरणं स्फोरणा स्फोरः संधा संधान संधयः।
भवेद्धर्म्यश्च हर्म्यञ्च तथा हर्मोऽपि च स्मृतः।। ।।224।।

चतुरूपम्

अग्रमग्र्यं तथाऽग्रीयमग्रियं च प्रचक्षते ।
अंकूरमंकुरं च स्यादंकुरोंऽकूर इत्यपि ।। ।।225।।

अनूक्षणं नूक्षणं चाप्यनुक्षणमवक्षणम् ।
आच्छभल्लश्च भल्लश्च भल्लूकश्चापि भल्लुकः।। ।।226।।

अवग्राहोऽवग्रहश्च वग्राहो वग्रहोऽपि च ।
कंतुकं कंदुकं चैव गंदुकं गेंदुकं तथा ।। ।।227।।

कौतुकं कुतुकं च स्यात् कौतूहल कुतूहले ।
गुच्छो गुंभो गुळुच्छश्च गुळुश्च परिकीर्तितः।। ।।228।।

गोशीर्षं गोशिरश्चैव गावं गोशीर्षिकापि च ।
चंद्रमाश्चंदिरश्चन्द्रमसश्चन्द्रश्च कीर्तितः।। ।।229।।

चंद्रभागा चांद्रभागा चांद्रभागी च सम्मता ।
चांद्रभागी च सैवोक्त भवेदेवं चतुर्विधम् ।। ।।230।।

In Public domain. Digitization Muthulakshmi Research Academy

चिवरं चीवरं चीरी चवरः परिकथ्यते ।
जनिश्च जन्म जनुषी जननं चेति कथ्यते ।। ।।231।।

जंभ जंभिर जंभीर जंफलाः कथितास्समाः।
जलूकाच जिलूका च जलौकाश्च जलौकसः।। ।।232।।

जागरो जगरा जागर्याजागरणमित्यपि ।
जंघारिका जंघरिका जंघा जंघिक इत्यपि ।। ।।233।।

जीवनीया तथा जीवा जीवंती जीवनीत्यपि ।
झारी झरी झरश्चापि झरिश्चपरिकीर्तितः।। ।।234।।

तमश्च तमसंचापि तामसंच तमिस्समाः।
तटाक तटकश्चस्यात् तडाकस्तडगोऽपि च ।। ।।235।।

तुंदी च तुंदिलश्चापि तुंदिरस्तुंदिभस्समाः।
द्रेक्कं द्रेक्काण दृक्काणौ भवेयुस्ते द्रुकाणवत् ।। ।।236।।

दूषिकायां दूषिका च दूषी दूषश्च कथ्यते ।
द्रामिडो द्रमिडश्चापि द्रविडो द्राविडस्तथा ।। ।।237।।

धनुर्धनुश्च धनुषो धनूश्चापि प्रकीर्तितः।
नाळा नाळी च नाडी च नाळं च परिकीर्तितम् ।। ।।238।।

निचोळश्चापि निचुळश्चोळश्चोळी च कीर्तिता ।
नखरश्च नखश्चस्यात् नखरं च नखं तथा ।। ।।239।।

द्विरूपकोशः
Public domain. Digitization Muthulakshmi Research Academy

निष्कूहो निष्कुहश्चापि निष्कूटो निष्कुटोऽपि च ।
नळिनी नळिनं चापि नळिका च नळं तथा ।। ।।240।।

पनितं पणितं च स्यात् पनायित पनायते ।
बाह्लीको बाह्लकश्च स्यात् बाह्लीकमपि बाह्लिकम् ।। ।।241।।

भावुकं भवुकं चापि भविकं भव्यमित्यपि ।
भ्रूकुटिर्भ्रुकुटिश्चापि भ्रुकुटी भ्रकुटिस्तथा ।। ।।242।।

मरुतश्च मरुच्चापि मरुत्वान् मारुतस्तथा ।
मकुटं मकुटी च स्यात् मुकुटी मुकुटस्तथा।। ।।243।।

मसूरा मसुराचापि मसूरी मसुरीति च ।
युगळी युगळं युग्मं युगं च परिकीर्तितम् ।। ।।244।।

रोहिणी लोहिनी च स्यात् रोहिता लोहिता पि च ।
विसृतं विस्तृतं चापि विततं ततमित्यपि ।। ।।245।।

विडूरजं च वैडुर्यं वैदूर्यं च विदूरजम् ।
वाराणसी वारणसी वारणासी वराणसी ।। ।।246।।

शललं शलली चैव शलं शैलं च लोमनि ।
शय्या च शयनीयं च शयनं च शयस्तथा।। ।।247।।

सरयूः शरयूश्चापि सरयुश्शरयुस्तथा ।
हालाहलं हालहलं हलिहालं हलाहलम्।। ।।248।।

In Public domain. Digitization Muthulakshmi Research Academy

पंचरूपम्

कंडूयनं च कंडूयू कंडूः कंडूति कंडुती ।
किसालयं किसलयं किसालं किसलं किसम् ।। ।।249।।

कुवालयं कुवलयं कुवालं कुवलं कुवम् ।
धनिर्धन्यकधान्याके धन्यं धान्येयकं तथा ।। ।।250।।

पत्रा पत्री पत्रिका च पत्रकं पत्रमुच्यते ।
मारुषो मरुषो मर्षौ मारुषं मरुषं तथा ।। ।।251।।

लोलूपो लोलूभो लोलो लंपटो लालसोऽपि च ।
श्लेषः शेषं च श्लिष्टं च शेषितश्चैव शैषिकः ।। ।।252।।

शिवलं शैवलं चापि शैवालः शैवता तथा ।
शिवालं चेति रूपाणि पञ्चधा परिकथ्यते ।। ।।253।।

हासश्च हासिका हासो हसनं हास्यमित्यपि ।

इत्थं सत्कविराजराजमकुटालङ्कारहीरायित
श्रीहीरात्मभवेननैषधमहाकाव्योज्ज्वलत्कीर्तिना ।
उद्धृत्तप्रतिवादमस्तकतटी विन्यस्तवामाङ्घ्रिणा
श्रीहर्षेणकृतं चिरं विजयतां श्रीकोशरत्नं महत् ।।

****

In Public domain. Digitization Muthulakshmi Research Academy

द्विरूपपदानुक्रमणिका

अ

अञ्चलं –आञ्चलम् 8
अंतरिक्षं – अन्तरीक्षम् 14
अंतिकः - अंतिका 8
अंत्यः- अंतः 2
अंधं- कबंधम् 1
अंधुः - आंधुः 1
अकालं - आकालम् 8
अकूपारः - कूपारः 11
अक्षोहिणी - अक्षौहिणी 11
अगुरुः- अगरुः 6
अगस्त्यः- अगस्तिः 4
अगारं - आगारम् 4
अघमर्षः -अघमर्षणम् 10
अजगरः-अजगलः 9
अटरुषः- अटरूषः 11
अट्टः - आट्टालकः 3
अध्युष्टं -अध्युषितम् 6
अनड्वाही - अनडुही 12
अन्वयः-अन्ववायः 5
अन्वितं- अन्वीतम् 9
अपगां -आपगाम् 4
अपतीर्थं - पतीर्थम् 12
अपिधानं - पिधानकम् 13
अपूपः- पूपः 3
अप्पतिः-अपांपतिः 3
अप्सराः- अप्सरसः 6
अभ्यूषः -अभ्युषः 6
अभ्रं - आभ्रम् 2
अमर्षः -आमर्षः 5
अमिषं - आमिषम् 9
अम्लः- आम्लः 2
अररं - अररी 7
अराति-आराति 4
अरे - आरे 2
अर्गळा - अर्गळम् 7
अर्द्रं -आर्द्रम् 2
अळिः- आळिः 3
अळीकं - अळिकम् 5
अवंतिः- अवन्ती 7
अवतारः - अवतरः 13

In Public domain. Digitization Muthulakshmi Research Academy

अवनी -अवनिः 9
अवमानः - अपमानः 10
अवश्यायः -अवश्ययः 12
अवहितं - वहितम् 13
अवहेळा - वहेळना 10
अवाची अपाची 7
अश्रीलं - अश्लीलम् 8
अश्रु- अस्त्रु 2
अस्त्रं -आस्त्रम् 2
अहंकारः - हंकारः 10
अहंवीरः- हंवीरः 12
अहिः आहिकः 1
अहो - आहो 1

आ

आक्षति -अक्षतम् 5
आजिः- आजी 15
आटिः - आतिः 14
आतिथ्यं- आतिथेयम् 16
आन्वीषकी-आन्वीक्षकी 18
आपः-आपसा 16
आपोगंडः - पोगंडः 13
आप्लावः- आप्लवः 17
आमिक्षा-अमिक्षा 18
आयुः- आयुषा 15
आरग्वधा- आरागवध 19
आर्यः - अर्यः 14
आलस्यः- अलसः 17
आलापः- आलपनम् 17
आळिः-आळी 15
आवालं -आलवालम् 17
आवासः- अवासः 16
आशीः - आशि 15
आश्रयाशः-आश्रयानः 18
आश्रिः-अश्रिः 15
आसा- आस्थानम् 18
आहतं- अनाहतं 16
आहितुंडिकः-अहितुंडिकः 14

इ

इंगुदी-इंगुदः 20
इंदिरा-इंदीरा 20
इषिका-इषीका 20
इष्टं - ईष्टं 19

In Public domain. Digitization Muthulakshmi Research Academy

ई

ईश्वरी -ईश्वरा 21
ईषा-ईशा 20

उ

उतं-ऊतम् 21
उंदुरुः- उदीरुः 25
